स्त्रियां तुम्पती-न्ती, इति रूपद्वयम् । 'आच्छीनद्योर्नुम्' (7-1-80) इति नुम्विकल्पः । [1]प्रस्तुम्पन् ।

(744) "तुन्फ हिंसार्थः" (I-भ्वादिः-409. सक. सेट्. पर.)

तुम्फकः-म्फिका, तुम्फकः-म्फिका, तुतुम्फिषकः-षिका, तोतुफकः-फिका ; तुम्फिता-त्री, तुम्फयिता-त्री, तुतुम्फिषिता-त्री, तोतुफिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकतुन्पधातुवत् (742) बोध्यानि । क्त्वायां 'न क्त्वा सेट्' (1-2-18) इत्यस्यापवादतया 'नोपधात् थफान्ताद्वा' (1-2-23) इति कित्त्वस्य विकल्पितत्वात् कित्त्वपक्षे 'अनिदिताम्—' (6-4-24) इति नलोपे तुफित्वा इति रूपम्, कित्त्वाभावपक्षे तुम्फित्वा इति रूपद्वयं भवतीति विशेषः । घञि [A]प्रतुम्फः ।

(745) "तुन्फ हिंसार्थः" (VI-तुदादिः-1312. सक. सेट्. पर.)

तृम्फादिः ।

तुम्फकः-म्फिका, तुम्फकः-म्फिका, तुतुम्फिषकः-षिका, तोतुफकः-फिका ; तुम्फिता-त्री, तुम्फयिता-त्री, तुतुम्फिषिता-त्री, तोतुफिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि गुन्फधातुवत् (407) ज्ञेयानि । शतरि सन्तुम्फन्-[B]ती-न्ती ।

(746) "तुप हिंसार्थः" (I-भ्वादिः-404. सक. सेट्. पर.)

'शपि तोपति हिंसार्थां तत्रैव तुपतीति शे ॥' (श्लो. 138) इति देवः । तोपकः-पिका, तोपकः-पिका, तुतोपिषकः-तुतुपिषकः-षिका, तोतुपकः-पिका ; तोपिता-त्री, तोपयिता-त्री, तुतोपिषिता-तुतुपिषिता-त्री, तोतुपिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि कुचधातुवत् (200) ज्ञेयानि ।

---

1. 'प्रात् तुम्पतौ गवि कर्तरि' (ग. सू. 6-1-157) इति पारस्करादिषु पाठात् प्रपूर्वकादस्मात् गवि कर्तरि सुट् । एवं तव्यदादिष्वपि ज्ञेयम् ।

A. 'अत्रुम्प्यधामानमिनं प्रतोफितुं प्रतुम्फशीलान् मिलतोऽथ राक्षसान् ।' धा. का. 1. 53.

B. '—राज्ञो नित्यमतुम्फकान् वितुफती बन्धूंश्च सन्तुम्फती ।' धा. का. 2. 74.